# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर/दिसम्बर, २०१६

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – 6** गुणाः - ७०

विषयः – वेद: **कोड – C..1.1.2** समयः – ३: ००त: ६: ००

दिनाङ्कः – १०-१२-२०१६ सन्दर्भग्रन्थः –शुक्लयजुर्वेदमाध्यन्दिनसंहिता

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोःससन्दर्भं भाष्यं लिखत।** ०८

(१) सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः।
इन्द्रस्य त्वा भागꣳसोमेनातनच्मि विष्णो हव्यꣳरक्ष॥

(२) भूताय त्वा नारातये स्वरभिविख्येषं दृꣳहन्तान्दुर्याः पृथिव्याम्।
उर्वन्तरिक्षमन्वेमि पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थेऽग्ने हव्यꣳरक्ष॥

(३) देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
संवपामि समाप ओषधीभिः समषधयो रसेन। स रेवतीर्जगतीभिः पृच्यन्ता
संमधुमतीर्मधुमतीभिःपृच्यन्ताम्॥

**प्रश्नः – २ पुरोडाशनिर्माणविधिं यथाशास्त्रं प्रतिपादयत।** ०८

**अथवा**

**हविर्धानशकटविषये समन्त्रं विवृणुत।**

**प्रश्नः – ३ निम्नलिखितेषु टिप्प्पणीद्वयं लेख्यम्।** ०४

(१) व्रतग्रहणम् (३) यज्ञियजलपात्रम्
(२) पवित्रच्छेदनम् (४) कृष्णाजिनम्

**प्रश्नः – ४ अधोलिखितेषु पञ्चानां पदानां भाष्यानुसारमर्थं लिखत।** ०५

(१) ऊर्जे (४) जुष्टम् (७) कर्मणे
(२) सुप्वा (५) शर्म
(३) अन्वेमि (६) धान्यम्

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्या विधेया** ०८

(१) अदित्यै व्युन्दनमसि विष्णोः स्तुपोस्यूर्णम्रदसं त्वास्तृणामि स्वासस्थां देवेभो भुवपतरं
स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा॥

(२) वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि। अग्ने बृहन्तमध्वरे॥

(३) एतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे।
तेन यज्ञमव तेन यज्ञपतिं तेन मामव॥

**प्रश्नः – ६ दर्शेष्टेः पौर्णमासेष्टेश्च परिचयः प्रदीयताम्।** ०८

**अथवा**

**वेद्यां जुहूपात्रधारणविधिंसमन्त्रं प्रस्तूयताम्।**

**प्रश्नः – ७ द्वे टिप्पण्यौ लेखितव्ये।** ०४

(१) इध्मप्रोक्षणम् (३) पुरोडाशभक्षणम्

(२) अग्नौ समिधादानम् (४) जुहूपभृतौ व्यूहति

**प्रश्नः – ८ अधोलिखितेषु पञ्चानाम् अर्थं लिखत ।** ०५

(१) आखरेष्ठः (४) मघवानः (७)वाजस्य

(२) कवे (५) घृताची

(३) अध्वरम् (६) अव

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ९ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्या विधेया** ०८

(१) वेदोऽसि येन त्वं देव वेददेवेभो वेदोऽभवस्तेनमह्यं वेदो भूया।
देवा गातुविदो गातुं वित्वागातुमित। मनसस्पत इमं देव यज्ञ स्वाहा वाते धाः॥

(२) अग्ने व्रतपते व्रतमाचरिषं तदशकं तन्मेऽराधीदमहं यऽ एवास्मि सोऽस्मि॥

(३) ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिसृतम्
स्वधास्थ तर्पयत मे पितृन्॥

**प्रश्नः–१० गार्हपत्याग्नेः वैशिष्ट्यं समन्त्रकं वर्णयत।** ०८

**अथवा**

**पिण्डपितृयज्ञविषये मन्त्रैः सह विवेचनं कुरुत।**

**प्रश्नः -११ टिप्पणीमेकं लिखत।** ०२

(१) संस्रवभागाः (२) सूर्यस्यावृतमन्वावर्ते

**प्रश्नः-१२ अधोनिर्दिष्टेषु द्वयोः लघूत्तरं यच्छ।** ०२

(१) शुक्लयजुर्वेदस्य माध्यन्दिनशाखायाः प्रथमेऽध्याये कति मन्त्राः?

(२) शुक्लयजुर्वेदस्य प्रथमोऽध्येता कः ?

(३) महीधरः कस्य वेदस्य भाष्यकारः ?

(४) दर्शयागः श्रौतयागः कथ्यते स्मार्तो वा ?

***